निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक्॥" (Amara I. 1.5)

'कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु (Amara I.9.7)' इत्यादौ, 'भगो योनिर्द्वयोः (Amara II. 6.76)' इत्यादौ, 'न ना क्रोडं भुजान्तरम् (Amara II. 6.77)' इत्यादौ च तटयोनिक्रोडपदानां त्रिलिङ्गत्वं, स्त्रीलिङ्गपुंल्लिङ्गत्वं, (नपुंसकस्त्रीलिङ्गत्वं) च। *त्वन्ताथादिपदं च क्वचिन्नामसम्बन्धित्वेन क्वचिल्लिङ्गसम्बन्धित्वेन, क्वचिदर्थसम्बन्धित्वेन च त्रिविधम्। तत्राद्यं 'अवश्यायस्तु नीहारः (Amara I. 3.18)', 'अथ हिमानी हिमसंहतिः (Amara I. 3.18)' इत्यादौ। 'अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् (Amara I. 3.12)' 'भार्या जायाथ पुंभूम्नि दाराः (Amara II. 6.6)' इत्यादौ द्वितीयम्। तृतीयं तु 'शापे त्वभिष्वङ्गः पराभवे (Amara III. 3.24)' 'अथ केसरे वकुलो, (वञ्जुलोऽशोकः) (Amara II. 4.64)' इत्यादौ।

यदत्र दूषितं **श्रीहर्षेण**, "समाहृत्यादौ अयमाशयः—विपुल[2]संकुलप्राचीनग्रन्थशब्दवर्गैः [3]रूपभेदादिपूर्वकं बहुलनामयावल्लिङ्गविशिष्टत्वेन ग्रन्थरचना क्रियते" इति श्लोकचतुष्टयार्थं† परिष्कृत्य 'हय उच्चैःश्रवास्सूतो मातलिर्नन्दनं वनम् (Amara I. 1.45)' इत्यत्र

1. Cf. Bhānuji's Vyākhyāsudhā on Amara under I. 1. 4.
2. Ms. corrupt विप्रलम्भ—
3. Śrīharṣa (JOR. Madras V. pp. 16-24) रूपभेदादिपूर्वकम्। MS. omits रूप; in view of Śrīharṣa's criticism, the reading रूपभेद etc. is necessary.

संस्कर्तुष्टिप्पणिका

* त्वन्ताथादि। 'तु' शब्दः अन्ते यस्य तत् त्वन्तम्, यथा 'अवश्यायस्तु नीहारः'। 'अथ' शब्दः आदिर्यस्य तत् अथादि, यथा 'अथ हिमानी हिमसंहतिः'।

† श्लोकचतुष्टयमेतद् अमरकोशीयम् १. १. २-५ कोशग्रथनपरिभाषाप्रतिपादकम्। तत्र निर्दिष्टानामन्यतन्त्रसमाहार-संक्षेप-प्रतिसंस्कारादीनां श्रीहर्षेण स्वचिकीर्षितदूषणावकाशलाभायैवमर्थपरिष्करः क्रियते, यथा रूपभेदबाहुल्ययावल्लिङ्गप्रतिपादनमिति। यथा चायमनुचितः श्रीहर्षपरिष्कारः तथा मण्डनकृता पूर्वं स्वपरिष्कारे प्रदर्शितम्, उपरि च प्रदर्शयिष्यते।

'हय उच्चैःश्रवा नीला(?)शुभ्राङ्गी (ङ्गः) शक्रवाहनः ।
सूतोऽस्य मातलिश्चित्रो देवसारथिरित्यपि ॥
वनं च नन्दनं देवकाननं नन्दनामकम् ।
देवोद्यानम् ॥'

इत्यादि **पर्यायरत्नमाला**रचितमस्ति नामबाहुल्यं हयादीनाम् । किंच

'मातलिः माकलिः[2] शक्रसारथिस्तु हर्यकपः'

इति **रभसः** । एवमेवं तत्र तत्र कोशेषु वर्तते । 'तदेकमेव* नाम रचितमिति बहुलयावन्नामता नास्तीत्यस्य निबन्धनभङ्गः" इत्यादिना—

तदयुक्तिसहम् ।

संक्षिप्तपदेनैव तद्दोषपरिहारात् । न च वाच्यं "'विपुलसंकुल' इत्यादिपरिष्कारापेक्षया विशेषपरिष्काराभावादश्रद्धेयत्वप्रसक्तेः" इति । तादृशपरिष्कारे संक्षिप्तपदार्थस्य अपरिष्कृतत्वाद् अस्मत्परिष्कृतसंक्षिप्तपदार्थेनैव तद्दोषपरिहारः सुकरः ।†

यदुक्तं—"किंच इन्द्रादिपदानां[3] प्रवचनात्तद्वाचकता[4] स्यात् । न च प्राचुर्येण प्रतिपादितमिति वाच्यम्; तस्य अविवक्षितत्वात्, स्वारस्याभावात् ।

'पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः । (Amara I. 10.17)'

इत्यादिषु बहुषु प्रतिपादितस्य व्यर्थतापत्तेश्च" इति—

तदपि मन्दम् । इन्द्रादिपदार्थप्रवचने प्राचुर्यविवक्षाया एव स्वरसत्वेन, तदपेक्षया स्वारस्यान्तराभावात्, प्राचुर्यस्यैव विवक्षितत्वे बाधाभावाच्च । एतेन

1. Ms. मालवि: Śrīharṣa corrupt माकविरितमसारथि:
2. Śrīharṣa. Corrupt.
3. Śrīharṣa. पर्यायाणाम्.
4. Śrīharṣa. Corrupt.

संस्कर्तुष्टिप्पणिका

* एकमेव नाम । इन्द्रहय-सूत-वनेषु 'उच्चैःश्रवाः', 'मातलिः', 'नन्दनम्' इति एकैकमेव नाम ।

† समाहृत्येत्यादिश्लोकचतुष्टयस्य 'विपुलसंकुलप्राचीनग्रन्थदृश्यमानबहुलयावल्लिङ्गविशिष्टत्वेन ग्रन्थरचना क्रियते' इति परिष्कारमुक्त्वा, अमरे दृश्यमाननानात्वतामालम्ब्य दूषयता श्रीहर्षेण 'संक्षिप्तैः' इति अमरोक्तं पदं विस्मृतम्; अत एव कृष्णसूरिणा 'संक्षिप्तपदमवलम्ब्य नानात्वतादोषः परिहियते । अस्मत्परिष्कृतेति । कृष्णसूरिकृतोऽर्थपरिष्कारः आदावेव तेन प्रतिपादितः 'संक्षेपश्च निघण्टुन्तरेषु + + + प्रसिद्धाप्रसिद्धसाधारण्येन गुंफितानां पर्यायाणां मध्ये प्रसिद्धयप्रसिद्धविशिष्टपर्यायकथनम्' इति । एवं परिष्कारं समाधानं चोत्प्रेक्ष्य खण्डनकृता इन्द्रादिपर्यायपाठे दृश्यमाननानात्वबाहुल्यमालम्ब्य, पृथुरोमादिमत्स्यपर्यायपाठे दृश्यमानाप्रसिद्धनामकथनमालंब्य च एतादृशपरिष्कारसमाधानयोः निर्मूलत्वं प्रदर्श्यते । मण्डनकृता तु इन्द्रमत्स्यादिस्थलेषु बहुनामकथनं प्राचुर्यविवक्षयैवेति निर्बन्धः क्रियते ।

" ' देवलोको देवनिधिः स्वर्गस्त्रिदिवभुवनं परम् ।
राजालयं(यः) सौख्यनिधिः निरर्गलशुभोदयः ॥
स्वर्लोकस्तूर्ध्वलोकःस्याद् अवरोहः फलोदयः ।[1]
मन्दरः सौरिकः शक्रभवनं खं दिवं नभः ॥ '[2]

इति केशवः ।

' पराळी(?)मेघनिलया सौख्याधारा सुखालया ।
दूर्वामरावती स्थूणा गुळूची त्वमरा स्मृता ॥[3]

इति विश्वप्रकाशकारः ।[4]

' शतकोटिर्भिदुर्वज्रं व्याधामः[5] शतधारकम् । '

इति वैजयन्त्याम् ।

' वज्रोऽशनिर्गिरीकंटः† पविर्दम्भोलिरम्बुजम् । '[6]

इति रभसः ।

' तारा भं रात्रिजं धिष्ण्यं सन्नक्षत्रमुडुर्न ना । '

इति वैजयन्त्याम् । (Oppert edn. P. 20, line 75)

' बलभद्रो बलश्चैव तस्य संवर्तकं हलम् ।
सौनन्दमस्य मुसलं खड्गस्तु खचित...॥ ' "

इत्यादिषु प्रतिसंस्कृतनिबन्धनस्य अजागलस्तनता परास्ता ॥

---

1. अवरोऽधःफलोदयः in MS. Śriharṣa: अपलोदपलोदयः ! For correct reading adopted above, see Puruṣottama, Trikāṇḍaśeṣa I. 4. also Śabdakalpadruma where Jaṭādhara and Śabdaratnāvalī are quoted; for some of these names, see also Vaijayantī p. 3.

2. The whole line occurs in the same manner in the Trikāṇḍaśeṣa, I. 4, but Puruṣottama reads ' Sairibha ' instead of ' Saurika ' which is the reading in Vaijayantī too (p. 3).

3. Parālī is read as Varālī in Śrīharṣa ; both are obscure. *While the first line seems to record synonyms of Indra's city, the second line gives the Nānārthas of ' Amarā ', a herb; probably there is a confused extension of all the Nānārthas of Amarā to Amarāvatī too.*

4. Viśvaprakāśikā in Śrīharṣa.

5. Ms. and Śrīharṣa–Vyādhāva ; for Vyādhāma, see Vaijayantī, Abhidhānacintāmaṇi etc.

6. Ms. अक्षखम् Śrīharṣa अक्षभम्. For Ambuja, which is correct, see other Kośas cited above, as also Kalpadrukośa.

संस्कर्तुर्दृष्टिप्पणिका

† गिरीकण्टः = गिरिकण्टकः ।

किञ्च " उपेन्द्र इन्द्रावरजः ' (Amara I. 1.20) ' माधवः ' (I. 1.18) ' श्रीपतिः ' (I. 1.21) [हरिः] इत्यादिकं क्वचिदुक्तमेवेति पुनःस्मरीकरिष्यते " इत्युक्त्वा " एवं च एतत्तात्पर्येणैव ' दावस्तु दवो वनहुताशनः '[1] इत्युपक्रम्य ' वाणिज्यं तु वणिज्या स्यात् ' (Amara II. 9.79) इत्याद्युक्ता; एवं चात्र यावद्विकारवक्तृत्वस्य विषयत्वमिति स्फुट्यते "—

इति वदता स्वस्यैव यावद्विकारवक्तृत्वं प्रदर्शितम्।*

यदप्युक्तं " कोशस्तु द्विविधः पर्यायनानार्थभेदात्। अत एव **पर्यायरत्नमाला, पर्यायार्णवः, नानार्थचन्द्रिका, नानार्थशिखामणिः, शब्दशब्दार्थमञ्जूषा** इत्यादिरूपेण लोकव्यवहारः। एष तु द्विविधरूपः†, सलिङ्गनिर्लिङ्गवर्गव्यतिषिक्तवर्गाणां पर्यायत्वादस्मिन्‡। अत एव ' एकार्थवाचिशब्दानां पर्यायो मेलनं मतम् ' इति **सुदर्शनाचार्यभट्टाचार्यो** आहुः " इति—

—एतत्सर्वम्

अव्युत्पन्नजनमुखमर्दनम्। तथा हि नामलिङ्गानुशासनमित्यत्र पर्यायाणां नानार्थानामव्ययानामनव्ययानां च सर्वेषां शब्दानां नामपदस्यैव सङ्ग्राहकत्वेन वाचकत्वात्।

---

1. This is not found in many current edns. of the Amarakośa.

संस्कर्तुष्टिप्पणिका

* गन्धवह-गन्धवाह, तारा-तारका, रोहित-लोहित, निकाण-निकण-काण-कण-कवण, वाणिज्य-वणिज्यादिस्थलेषु नात्यन्तभिन्नरूपभेदानां नाम्नां संग्रहो दृश्यते; एवमेव उपेन्द्र-इन्द्रावरज-शब्दौ नात्यन्तं भिन्नौ ; माया धवः इति विग्रहे माधवश्रीपतौ न भिन्नौ ; कुतो गता एतादृशस्थलेषु भवतोक्ता ' संक्षिप्तैः प्रतिसंस्कृतैः ' इति प्रतिज्ञा। यदि प्रसिद्धाप्रसिद्ध-नात्यन्तभिन्नरूपभेदानामपि ग्रहणं, कुतस्तथा इन्द्र-मातल्यादिपर्यायपाठे बहूनि नामानि त्यक्तानि इति श्रीहर्षस्य खण्डनप्रक्रिया। यावद्विकारेति। यावन्त एकस्य शब्दस्य गन्धवह-तारा-निकाणादिकस्य विकारा वर्तन्ते तावतां वचनम्। मण्डनकारेण तु अमरसिंहदोषोद्घाटनमसहमानेन श्लेषमालम्ब्य श्रीहर्षे यावद्विकारवक्तृत्वं सुतराममनोज्ञजल्पित्वं चोद्यते।

† ‡एष, अस्मिन्निति अमरकोशपरामर्शः। सलिङ्गेत्यादि। त्रिकाण्डोत्पलिन्यादीनि नाममात्रतन्त्राणि ; व्याडिवररुच्यादिप्रणीतानि लिंगमात्रतन्त्राणि। अत्र तु नामलिङ्गयोरनुशासनं वर्गशः व्यतिषिक्तानां नाम्नां तथा प्रतिपादनम्। सलिङ्गानामलिङ्गानां लिङ्गनिर्देशपूर्वकं निर्लिङ्गत्वनिर्देशपूर्वकं चात्र वर्गीकृतानां पर्यायानां प्रतिपादनमिति अमरस्य प्रतिज्ञेति श्रीहर्षेण खण्डनकृता परिष्कारः कृतः। एतत्परिष्कारानुसारेण नामलिङ्गानुशासनमित्यत्र नामपदस्य पर्यायपदमित्येवार्थः, तदनुविद्धत्वेन च लिङ्गस्याप्यनुशासनमित्यर्थः। अयं च नामसंबन्ध्यभिन्नलिङ्गानुशासनमिति परिष्कारो मण्डनकृता दूष्यते। पर्यायनानार्थत्वेनैव कोशानां द्वैविध्ये, यदत्र पर्यायलिङ्गप्रतिपादनरूपेण अमरस्य द्वैरूप्यमिति च खण्डनकृता चोदितं दूषणम्, तत्रैवं मण्डनकृतस्समाधानम्—नानार्थेभ्य एव पर्यायाणामुद्धार्यत्वात्, ' नाम ' इति पदस्यैव पर्यायनानार्थसामान्येन सर्वत्र शक्तत्वात्, ' प्रतिसंस्कृतैः ' इति पदस्य च विशिष्य नानार्थवर्गे तात्पर्यवत्त्वाच्च, अयमरमरकोशोऽपि पर्यायनानार्थत्वेनैव द्विविध इति।

न हि नामसंबन्ध्यभिन्नलिङ्गानुशासनमिति तदर्थः परिष्कर्तव्यः, येनोक्तदूषण-दूष्यता स्यात्। न चैवं सति प्रतिसंस्कृतिनिबन्धनस्य अजागलस्तनता तदवस्थेति वाच्यम्। बहूनां शब्दानामेकार्थवाचकत्वं पर्यायत्वम्, एकस्यानेकेषां वा शब्दानां नानार्थवाचकत्वं नानार्थत्वमिति परिष्कारे, नानार्थवाचकतायामेव हि पर्यायतायां उद्धर्तव्यत्वेन प्रतिसंस्कृतनिबन्धस्य नानार्थनिबन्धोपलक्षकत्वात्। अन्यथा पर्यायनानार्थसाधारणस्य नामलिङ्गानुशासनमित्यत्र नामपदस्य प्रयोगवैयर्थ्यं स्यात्; तत्प्रयोगे वा नामसंबन्ध्यभिन्नलिङ्गानुशासनमित्येव परिष्कारश्च स्यात्; सति च तथैव परिष्कारे लिङ्गानुशासनस्यैव प्रारिप्सितत्वेन, तदतिरिक्तस्य नामानुशासनस्यापि कृतत्वात् अनभिमतार्थसिद्धिरर्थान्तरमिति अर्थान्तरदोषस्य प्रतिज्ञाहान्यादिदोषाणां च अनुद्धारप्रसङ्गश्च स्यात्; एवं च कृत्स्नस्यापि तदीयप्रकृतसन्दर्भस्य उन्मत्तप्रलपितत्वं च स्याद् इत्यनन्तदूषणहतिः प्रसज्येत।

अतो नाम[1]पदस्यैव नानार्थादि[2]सर्वसङ्ग्राहकत्वेन प्रतिसंस्कृतनिबन्धस्य नानार्थोपलक्षकत्वमेव युक्तम्। एतदभिप्रायेणैव अव्ययवर्गोऽपि पर्यायनानार्थभेदेन निरूपितः।* एवं चात्रापि "[3](कोशस्तु)द्विविध "†इत्यादिना स्वस्यैव यावद्विकारवक्तृत्वं प्रकाशितमित्यलमल्पविषयपराक्रमेण।‡

---

1. Ms. ना. पदस्य.
2. Ms. नानार्थानां.
3. Ms. Gap.

संस्कर्तुष्टिप्पणिका

* 'संक्षिप्तैः प्रतिसंस्कृतैः, नामलिङ्गानुशासनम्' इति प्रतिज्ञावाक्यगतानां निबन्धनानां कृष्णसूरिकृतः परिष्कार इत्थम्—संक्षिप्तैरित्यस्यार्थस्तु पूर्वं दत्तः। नाम-लिङ्ग-अनुशासनमित्यत्र नाम्नां लिङ्गानां च अनुशासनमित्यर्थः। नामपदेन पर्यायपदानां, नानार्थपदानाम्, अव्ययानां चेति सर्वेषामेव ग्रहणम्। प्रतिसंस्कृतैरित्यस्य एषामेव पूर्वोक्तानां वर्गशः पर्यायतया गुम्फितानां पदानां पुनश्च नानार्थविभागेन प्रतिपादनमित्यर्थः। यदि तु नामलिङ्गानुशासनमित्यस्य नामानुविद्धलिङ्गानामनुशासनमित्यर्थः परिष्क्रियेत खण्डनकृता, तदा अमरस्य लिंगानुशासनमेव प्रवृत्तिनिमित्तं स्यात्, नामप्रतिपादनं तु नान्तरीयकतयैव प्राप्येत; तच्च नाभिमतमेव।

† कोशस्तु द्विविध इति खण्डनकृतोपक्रान्तस्य पूर्वपक्षस्य प्रतीकग्रहणम्।

‡ इतः परं खण्डनकृता स्थलद्वयमुदाहृत्य गुंफने सामान्यविशेषभावः क्वचिदादृतः क्वचिन्नेति दूषणमेकं कृतम्; तथा हि 'अमरा निर्जरा' इति अमरसामान्यनिर्देशानन्तरं तद्विशेषाणामिन्द्रादीनां निर्देशः कृतः। किन्तु 'असुरा दैत्य' इति असुरसामान्यमुक्त्वा तत्समनन्तरमेव 'राक्षसाः कौणपा' इति अनुक्त्वा, दिक्पालप्रस्तावे निर्ऋतिनिर्देशे राक्षसशब्दाः पठिताः। एतत्तु दूषणं मण्डनकृतोपेक्षितम्।

[Apsaras]

यदपि लिखितं "'स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः' (Amara I. 1.52) इति यदुक्तं, तदयुक्तम्। 'अप्सरा चाप्यप्सराश्च किञ्चाप्सरस इत्यपि' इति **मुचुकुन्दभाष्यविवरणे महेन्द्राचार्याः**। अत एव [1]**भास्करभाष्येऽ**पि बहुत्वम-**प्सरादीना**मितीदं सूचितमिति **शारदातिलकभाष्यविवरणेऽ**पि अस्मद्गुरवः **सङ्घभटाचार्या**[2] अप्याहुः। एतदधिकं तत्रैव द्रष्टव्यं सूक्ष्मशेमुषीभिः। तत्सर्वं नोक्तमिति तदज्ञता स्फुटीकृता च। न च[3] तत्सो अर्थवत्कृत्यैव (तत्सर्वं स्वीकृत्यैव) मार्गप्रदर्शनमेवं कृतमिति वाच्यम्। तथा चेत् 'जातिर्जातं च सामान्यम्' (Amara I. 4.31) 'स्थलं स्थली' (Amara II. 1.5) इति भणनमेव न स्यात्। तत्रापि तथैवेत्युक्तौ, अनवस्थादोषः। किञ्च विरिञ्चनादि (विरिञ्च्यादि ?) पर्यायाणामेकपर्यायविकारपठने-नैव चारितार्थ्यादन्येषामजागलस्तनतेत्येतावद्ग्रन्थविरोध एव स्फूर्जत्येवेत्यलं शोधित-शोधनेन" इति—

तदप्यविचारक्षमम्। अप्सरश्शब्दस्य सान्तस्य सप्तसु च विभक्तिषु बहुवचनस्यैव बहुभिर्महाकविभिः प्रायशः प्रयुक्तत्वेन, एकवचनस्याप्रयुक्तत्वेन च 'बहुष्वप्सरसः' इत्युक्तम्। आकारान्तस्त्वप्सराशब्दः सर्वग्रन्थद्रष्टृा **अमरसिंहेन** अभिप्रेतः, **आदिमहा-काव्ये रामायणे** प्रयुक्तत्वात्। तथा हि बालकाण्डे क्षीराब्धिमथनवर्णनप्रस्तावे—

'पूर्वं धन्वन्तरी राम **अप्सराश्च** सुवर्चसः।
अप्सु निर्मथनादेव रसास्तस्माद्वरास्स्त्रियः॥
उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन्।
षष्टिः कोट्योऽभवंस्तासामप्सराणां सुवर्चसाम्॥
असंख्येयास्तु काकुत्स्थ यास्तासां परिचारिकाः।'

(Bālakāṇḍa 45. 32–34)

इत्यादि। तत्र हि प्रथमाबहुवचनषष्ठी (बहु) वचनाभ्यामाकारान्तस्य, 'तस्मा-**दप्सरसोऽ**भवन्' इत्यप्सरश्शब्दस्य सान्तस्य तस्य प्रथमाबहुवचनेन च उभयोरपि साधुत्वं प्रदर्शितम्। अतस्तत्सर्वं नोक्तमिति तदज्ञता स्फुटीकृतेति प्रलपता स्वयैवात्य-न्ताज्ञता प्रदर्शितेति सुमहदाश्चर्यमेतत्।*

1. Śrīharṣa भास्कल.
2. Ms. सङ्घभट्टाचार्याः.
3. Corrupt in both Ms. and Śrīharṣa.

संस्कर्तुष्टिप्पणिका

* अस्य चाप्सरश्शब्दस्य आकारान्तादिरूपभेदाः बहुकोशादिग्रन्थोदाहरणपूर्वं कल्लोलभट्टेन दृष्टान्तसिद्धाञ्जने विस्तरशः प्रतिपादिताः।

[Tamas and Tarani]

यच्च खण्डितं (खण्डने) तम इति शब्दस्य पूर्वपक्षः—" ' तमस्तु राहुस्स्वर्भानुः सैंहिकेयो विधुंतुदः (Amara I. 3.26) ' इति यत्, तदसत्, तम इति शब्दस्य लिङ्गनिश्चयाभावात्। न च ' तमिस्रं तिमिरं तमः (Amara I. 8.3) ' इति वाक्यादत्रापि नपुंसकतैव उपेयात्[1]। अत एव ' रजो गुणेऽपि स्त्रीपुष्पे राहौ ध्वान्ते गुणे तमः (Amara III. 3.231) ' इत्यभिधानान्तरम्*; अतस्तत्रापि क्लीबतैवेत्युच्यत इति वाच्यम्। तर्हि ' पूः स्त्री पुरी नगर्यौ वा (Amara II. 2.1) ' इत्यस्य व्यर्थतैव; ' पुरम् (Amara III. 3.183) ' इत्युक्तादनुशासनादास्तामेतत्। यदि रूपभेदेनोच्यत इत्युच्यमाने पुंस्त्वे तदा ' राहौ ध्वान्ते (Amara III. 3.231) ' इत्यादिकोशविरोधः। किञ्च तव मतेनैव[2] पुंस्त्वानुशासनाभावाद् अत्यन्तक्लीबतैवेति सिद्धम्। किञ्च ' स्त्रियां नौस्तरणिस्तरिः (I. 10.10) ' इत्युक्तेस्तरणिशब्दस्य स्त्रीत्वे सति सूर्यपर्यायतरणिशब्दस्यापि स्त्रीत्वमेव स्यात्। यद्वा तेनात्रैव पुंस्त्वं वा स्यात्। अत्रोभयत्रापि लिङ्गैकत्वे न येन केनापि रचितं, न श्रुतं च[3]; अतस्त्वेवमेतस्मिन् ग्रन्थे कल्पितुं न युक्तम्। तथानुशासनाभावादशास्त्रीयत्वेन मायितैवैतावता, आस्तामिति।" यच्च सिद्धान्तितं—" तम इति पुंल्लिङ्ग इति **महेन्द्राचार्याः**। उक्तं च **शब्दशब्दार्थमञ्जूषायाम्**

' तमः पुंसि गुणे राहौ धूलिध्वान्तान्तरादिषु।
तमा तमी तमाश्चापि ध्वान्तादिषु समीहिता॥ इति।

अत एव तम इत्यादिकं पुंस्येव सम्यगिति मन्यतेऽस्मिन्नर्थे **सुदर्शनमिश्रैरिति शाबरभाष्यव्याख्याने गदाधरोऽप्याह** ' इति। तत्सिद्धम्" इति—

तदेतत् सर्वं मार्जालाभ्यङ्गायितम्। तमस्तु ' राहुस्स्वर्भानुः ' इति पुंल्लिङ्गभूतराहुशब्दसाहचर्यात् तम इति शब्दस्य पुंल्लिङ्गत्वमेवाभिप्रेतं मूलकृता। न च ' तमः पुंसि गुणे राहौ धूलिध्वान्तान्तरादिषु। तमा तमी तमाश्चापि ध्वान्तादिषु समीहिता॥ ' इति वचने ' तमा तमी तमाश्चापि ' इति स्त्रीलिङ्गपुंल्लिङ्गयोरुभयोरपि प्रदर्शितत्वेन पुंल्लिङ्गमात्रविधानाभिप्रायः मुण्डितशिरोऽलंकृतपुष्पमालायित इति वाच्यम्। ' तमः पुंसि गुणे राहौ ' इति गुणराह्वोरुभयोरेव पुंल्लिङ्गविधानात्; धूल्याद्यर्थेष्वेवोभयलिङ्गता-

1. Śrīharṣa उपेया.
2. Ms. मतैव Śrīharṣa मते.
3. Ms. Śrīharṣa Corrupt.

संस्कर्तुर्दिप्पणिका

* अभिधानान्तरमित्यत्र कोशान्तरमिति भ्रमो न कर्तव्यः। अमरकोश एव स्थलान्तरे अभिधानमुक्तिः इत्यर्थः।

दार्ढ्यार्थमेव 'ध्वान्तादिषु समीहिता' इति पुनरुक्तत्वाच्च। न च 'तमः पुंसि' इत्यादिना गुणाद्यर्थेषु सर्वेष्वपि प्रथमतोऽकारान्तपुंल्लिङ्गत्वं विधाय 'तमा तमी" इत्याद्युत्तरदलेन तु स्त्रीलिङ्गसकारान्तपुंल्लिङ्गत्वयोस्सर्वत्र विधानार्थं 'ध्वान्तादिषु' इति पुनरुक्तिरिति वाच्यम्। तादृशार्थप्रत्यायकतया 'गुणादिषु समीहिता' इति पाठस्यैव संभविष्यमाणत्वेन, तादृक्पाठं विहाय 'ध्वान्तादिषु' इत्युक्तौ तदर्थस्याप्रत्येयत्वात्। तस्माद्गुणराह्वर्थयोरेव पुंल्लिङ्गत्वमात्रविधानार्थं 'गुणे राहौ' इति व्यक्तविभक्तिकत्वेन निर्देशः कृतः। अत्र कैश्चिदनभिज्ञैः प्रलपितम् 'समासस्य गौरवतया लाघवार्थं व्यक्तविभक्तिकत्वेन 'गुणे राहौ' इति निर्देशः कृत इति तत्तुच्छम्। 'तमः पुंसि गुणे राहौ धूल्यां ध्वान्तेऽन्तरेऽपि च' इति पाठकरणे सर्वेषां शब्दानां व्यक्तविभक्तिकतया लाघवस्य सुगमत्वेन तद्विवक्षितार्थप्रत्यायकत्वेन च सर्वत्र व्यक्तविभक्तिकं पाठं विहाय श्लोकेषु केषुचिच्छब्देषु व्यक्तविभक्तिकतया लाघवाभ्युपगमस्य केषुचिच्छब्देषु समासघटिततया गौरवाभ्युपगमस्य चाप्रामाणिकत्वात्। तस्मात् 'तमस्तु राहुः' इत्यादिना प्रणयता अमरसिंहेन तम इति शब्दरूपस्य राहुवाचकस्य अकारान्तत्वेन पुंल्लिङ्गत्वमेव साहचर्यादवगन्तव्यमित्यभिप्रेतम्। अयं तु विवेकः— राहुवाचकतायां गुणवाचकतायां च तम इति शब्दस्य आदन्तः पुंल्लिङ्गसान्तोऽप्यस्ति; धूलिध्वान्तादिवाचकतायां तु सान्तौ पुंल्लिङ्गनपुंसकलिङ्गौ आकारान्त-ईकारान्तस्त्रीलिङ्गौ च सन्तीति। इत्थं च 'तमिस्रं तमः' इत्यन्धकारपर्यायस्य 'तम' इति शब्दस्य सान्तनपुंसकत्वे तात्पर्यम्। न तु सान्तपुंल्लिगस्य [1]आकारान्त-ईकारान्तस्त्रीलिङ्गयोश्च निषेधे[2]....।

किञ्च "स्त्रियां नौस्तरणिस्तरिः' इत्युक्तेः तरणिशब्दस्य स्त्रीत्वे सूर्यपर्यायतरणिशब्दस्यापि स्त्रीत्वमेव स्यात्, यद्वा तेनात्रैव पुंस्त्वं वा स्याद्" इति यद् आपादितं, तदज्ञानविलपितम्। 'स्त्रियां नौस्तरणिस्तरिः' इत्यत्र नौवाचकतरणिशब्दस्य 'स्त्रिया'मिति विशेषणविधिनैव पुंल्लिङ्गत्वस्य बाधितत्वाद् 'द्युमणिस्तरणिः मित्रः (Amara I. 3. 30)' इत्यत्र सूर्यपर्यायतरणिशब्दस्य नामरूपभेदेन पूर्वोत्तरसाहचर्याद्वा पुंल्लिङ्गत्वस्यैव निश्चितत्वाच्च।

'राहौ ध्वान्ते गुणे तमः' इति नानार्थवर्गस्थकारिकायाः 'तमोऽन्धकारे स्वर्भानौ तमश्शोके गुणान्तरे' इति **विश्वप्रकाशवचनस्य** च एषैव सरणिरनुसर्तव्येत्येतत्प्रपञ्चस्योदाहरणानि सुधीभिर्द्रष्टव्यानीत्युपरम्यते विस्तरभिया।

---

1. Ms. corrupt here.
2. Ms. appears to have a little gap here.

[Pīḍā]

पीडादिशब्दसिद्धान्तः

यच्च लिखितं — "यत्तु 'पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् (Amara III. 9.3)' इति तन्न। 'पीडा पीडश्च संमतः' इति पूर्वाचार्याः। 'चूडा गूडा नडा पीडा स्त्रियां पुंसि च रूढितः' इति **वज्रखड्गभट्टाचार्यो**ऽप्याह **शब्दरत्ने**। अत एवास्मत्तातचरणैः **शब्दचिन्तामणौ** 'पुंसि पीडादीनां कः (?) पीडः' इति कथितम्। तस्मात्तथैव तदिति मन्तव्यम्" इति—

तदनाघ्रा**तामरकोश**तात्पर्यकम्। तथाहि—'पीडा बाधा व्यथा दुःखम्' इति पीडादिशब्दांस्त्रीनपि स्त्रीप्रकृतिकतया पर्याययतो[1] ऽ**मरसिंह**स्य पीडादीनां पुंलिङ्गतायामपि तात्पर्यम्। न तु पुंलिङ्गत्वनिषेध स्त्रीलिङ्गताविधाने वा। अन्यथा 'समाहृत्यान्यतन्त्राणि' इति विदितसकल***शब्दरत्ना**-ऽभिधानकोशादिज्ञानवत**ामरसिंहेन** तृतीयकाण्डे सङ्कीर्णवर्गे 'ग्रहे ग्राहो वशः कान्तौ रक्षणस्त्राणे रथः क्वणे। व्यधो वेधे — ॥[2] (Amara III. 2.8)' इत्यत्र व्यध इति पुंलिङ्गत्वाभिधानमेव न क्रियेत।

किञ्च 'मेघोपलस्तु करकः' इति **यादव**वचने (Vaijayantī p. 25, line 14)† करकाशब्दस्य पुंस्त्वं विहितम्। 'वर्षोपलस्तु करका (Amara I. 3.12.)'

---

1. Ms. पर्यायतः.

2. Ms. 'व्यथो व्यथः'. In Amara I. 9. 3 the concerned word is व्यथा; according to all editions of Amara, in III. 2. 8, the word is व्यध; the two are two different words derived from two different roots; the author of the Amaramaṇḍana however, being an Āndhra who always pronounces and confuses between ध as ध, wrongly takes that the same word Vyathā of I. 9. 3 in fem. gender is given later in the Nānārtha as Vyadha in Mas. gender in III. 2. 8. Vyathā is 'pain'; Vyadha is 'piercing' and can mean 'pain' only in a secondary sense.

संस्कृतुष्टिप्पणिका

* श्रीहर्षेण स्वखण्डने समुदाहृतस्य वज्रखड्गीयशब्दरत्नस्य अमरकोशाद् अर्वाचीनतया, शब्दरत्नेत्यनुवदतो अत्र मण्डणकृतो लक्षणया सामान्येन बहूवभिधानकोशादौ तात्पर्यमिति बोद्धव्यम्।

† मुद्रितवैजयन्तीपुस्तके (२५ पृष्ठे) 'घनोपलस्तु करकः' इति पाठ उपलभ्यते। सल्लिनाथेन च मे. स. सञ्जीविन्यां च (श्लो. ९८) तथैव पठ्यते।

इति स्त्रीत्वं विधाय, ' कमण्डलौ च करकः ' (Amara III. 3.6) ' इति नानार्थे पुंस्त्वमपि प्रदर्शितम् इति **क्षीरस्वामिना**‡ उभयलिङ्गताप्रकाशनात्, **यादवस्वामिनः** पुंल्लिङ्गत्वाभिधाने तात्पर्यं, न तु स्त्रीलिङ्गनिषेध इत्युक्त्वा,

' करकस्तु करङ्के स्यात्पात्रेऽपि च कमण्डलौ ।
पक्षिभेदे करे शास्त्रे(?)करका च घनोपलः ॥ '

(Viśvaprakāśa, p. 6, śl. 49)

इति **विश्वप्रकाश**कारिका*, ' वर्षोपले तु करका करकोऽपि च दृश्यते ' इति **रुद्रनिघण्टु**कारिकापि† **मेघसन्देशसञ्जीविन्यां** (श्लो. ५८. ये संरम्भ०—) **मल्लिनाथेन** दर्शिते । तथा च पुंस्त्वविधिं स्त्रीत्वनिषेधं चाकुर्वन्नेव ' घनोपलस्तु करकः ' इति करकाशब्दस्य पुंल्लिङ्गं प्रदर्शयतो **यादवस्वामिनः** पुंल्लिङ्गत्वाभिधाने तात्पर्यं, न तु स्त्रीलिङ्गतानिषेध इति यथा **मल्लिनाथेन** कल्पितं, तथैव 'पीडा बाधा व्यथा दुःखम्' इति पीडादिपदानां त्रयाणां स्त्रीत्वविधानं पुंल्लिङ्गनिषेधं चाकुर्वतः स्त्रीत्वं प्रदर्शयतोऽ**मरसिंहस्य** पुंल्लिङ्गत्वेऽपि तात्पर्यम् इति कल्पयेम ।

न च वाच्यम्—' त्रिलिङ्ग्यां त्रिष्विति (Amara I. 1.5) ' इत्यादिप्रतिज्ञा-नैष्फल्यमिति । यत्र यत्र प्रकृतसन्दर्भे ' त्रिषु ' ' द्वयोः ' ' पुंसि ' ' न ना ' 'न द्वयोः' ' न स्त्रियाम् ' इत्यादिशब्दाः प्रयुज्यन्ते, तत्र तत्र तेषां तादृशशब्दानां तत्तल्लिंगानु-गुणविधिनिषेधौ ज्ञातव्यौ इति तदर्थत्वात् । न च वाच्यं यावल्लिंगानुशासनोक्तिप्रतिज्ञायाः वैफल्यमिति; पीडादिशब्दानां रूपभेदेनैव द्विलिङ्गत्वात् । एतदभिप्रायेणैव **राजशेखरेणापि** प्राचा प्रयुक्तम्—' यात्यस्ताचलचूड[1]मुद्वसमधुच्छत्राकृतिश्चन्द्रमाः§ (विद्धसालभञ्जिकायां १.११) ' इति चूडाशब्दस्य पुंल्लिङ्गत्वमित्यलमनल्पोपपत्तिकल्पनेन ।

1. MS. —मुद्वससमधिच्छाया — Corrupt.

संस्कर्तुष्टिप्पणिका

‡ अमरकोशोद्घाटने १. ३. १२.

* इयं च कारिका मुद्रिते महेश्वरकृते विश्वप्रकाशे समुपलभ्यते (६-पृष्ठे, श्लो. ४९) । तत्र पाठस्तु—करकस्तु करङ्के स्यादाडिमे च कमण्डलौ । पक्षिभेदे करे चापि करका च घनोपले ॥ मल्लिनाथेन च तथैव पठ्यते ।

† इदं च रुद्रनिघण्टुवचनं सर्वानन्दीयेऽमरव्याख्याने चोदाहृतम् । T. S. S. edn. p. 58.

§ मुद्रितपुस्तके ' यातोऽस्ताचलचूलमुद्वसमधुच्छत्राकृतिः ' इति पाठः । उद्वसो गतः मधुः वसन्तः, तच्छत्राकृतिः ।

[Mahī, Kṣoṇī]

यदपि महीक्षोण्यादिशब्दपूर्वपक्षः—" 'मही' 'क्षोणी' 'भूमिः' (Amara II. 1.2-3) ' इति यत्, तन्न । अत्र इकारान्त-ईकारान्तयोस्सत्त्वात् । यदाहुः **कोकिलाक्षिभट्टाचार्याश्चन्द्रिकायाम्**—

' कही मही सही क्षोणी, मतिभूमि[1] मही(?)मुखाः ।
ईकारान्ता इकारान्ताश्चेति सर्वज्ञशासनम् ॥ '

इति । अत एव प्राञ्चः **शब्दानुशासने**ऽप्याहुः ' ईकारान्ता इकारान्ता इकारान्ताः तथैव हि* । ' इति । एवं तत्र तत्र योज्यम् । अत एवान्येऽप्याचार्या आहुः—' पुरः पुरा पुरं पुरी महिर्मही ' इत्यादिना " इति—

तदप्यपरिज्ञाताऽमरसिंहाभिप्रायमेव । तथा हि

महीक्षोण्यादिशब्दसिद्धान्तः—

अत्र भूमिपर्यायेषु भूम्यवनीक्षोणीक्षितिमहीधरणीतिशब्दानां केषांचिदिकारान्तत्वप्रदर्शनं केषांचिदीकारान्तत्वप्रदर्शनं च एतेषां सर्वेषामुभयान्तत्वज्ञापनार्थम्; ' कृदिकारादक्ति नः (Vārttika) ' इति क्तिन्नन्तव्यतिरिक्तानां शब्दानां ङीषो वैकल्पिकत्वात् । अन्यथा सर्वेषामिकारान्तत्वमाकारान्तत्वमात्रमेव प्रदर्शयिष्येत । किञ्च ' मतिभूमिमहीमुखाः ' इति क्तिन्नन्त-अक्तिन्नन्तसाधारण्येनैव **चन्द्रिकाया**मुभयान्तत्वकल्पने, **अमरसिंहस्य** अक्तिन्नन्तमात्रस्यैवोभयान्तत्वाभिप्रायकत्वकल्पनं न अभिज्ञताभञ्जकम् । व्याख्यातं च **दीक्षितीये**† भूपर्यायव्याख्यानावसरे—अत्र भूम्यवनिक्षोणीमहीधरणीशब्दाः कृदिकारान्ताः कृदिकारादक्तिन इति एतेभ्यो वा ङीषिति रमणीयमेव **अमरसिंहस्य** भूम्यादिशब्दानामिकारान्त-ईकारान्तोभयान्तत्वाभिप्रायकत्वमित्यलमकाण्डताण्डवेन ।

[Harmya]

यत्तु " ' हर्म्यादिर्धनिनां वासः (Amara II. 2.9) ' इति यत्, तदयोग्यम्, लिङ्गनिश्चयाभावात् । यदि पूर्वोत्तरपर्यालोचनया पुंल्लिंग इति प्रवदति, तर्हि तदप्यायासकरमेव । ' हर्मि हर्मिश्च हर्म्यश्च हर्म्यं हर्म्यापि राड्गृहे ' इति **शब्दरत्न**पाठात् । अत एवाधुनिका अप्येवमाहुरिति योज्यम्[2] " इति—

---

1. Ms. भूमि.
2. Ms. अधुना अप्येवमाहुरिति योज्यम्. Śrīharṣa आधुनिका अप्येवमाहुर्योज्यम्.

संस्कर्तुष्टिप्पणिका

* तथैव हि यथा ईकारान्ता इकारान्ताः, तथैव इकारान्ताश्च ईकारान्ता इत्यर्थः ।

† दीक्षितीये भानुजिदीक्षितीये । तत्र तु वस्तुतोऽयमभिप्रायस्सङ्ग्रहेणैव दत्तः, न त्वेतैरेव वाक्यैः ।

(हर्म्यादिरित्यत्र सिद्धान्तः ।)

तदप्यसुन्दरम् । हर्म्यादिरित्यत्र आदिशब्देनैव हर्म्यपदस्य लिङ्गिताया द्योतितत्वात्* । अन्यथा तु ' हर्म्यं तु धनिनां वासः ', ' हर्म्या तु ', ' हर्म्यस्तु ' इति पुंल्लिङ्गाद्यन्यतमेनैव त्वन्तपदेन मूलकृता पाठः कल्प्येत । शब्दरत्नादि[1]सकलकोशजातमपि विमृश्यैव प्रकृतसन्दर्भस्य तेन प्रणीतत्वाच्चेति ।

[Nirjhara, Jhara]

यत्तु " ' निर्झरो झरः (Amara II. 4. 5) ' इत्यत्र लिङ्गविशेषनिरूपणाभावात् बाधकमेव । ' झारी झरा झरिर्झारिर्झारा झारश्च[2] निर्झरः ' इति **शब्दशब्दार्थमञ्जूषोक्तेः** " इति,—

तन्मन्दम् । ' निर्झरो झर ' इति उभयोद्देशेनैव प्रसिद्ध्या पुंल्लिङ्गं प्रदर्शितम् । निषेधाभावात् लिङ्गान्तरेऽपि तात्पर्यम् । संक्षिप्तप्रतिसंस्कृतनिबन्धेन वा तद्दोषपरिहाराच्च ।

[Sumanas]

सुमनश्शब्दसिद्धान्तः

यदपि च प्रलपितम् " ' स्त्रियः सुमनसः पुष्पम् (Amara II. 4.17) ' इत्यत्र न सुमनस इति बहुवचनं युक्तम् । ' सुमनः सुमनाः स्त्रियाम् ' इति **चक्रवर्त्युक्तेः**। ' सुमनस्सुमनाश्चैव स्यात् क्रमात् पुंसि च स्त्रियाम् ' इति **केशवभट्टाचार्याः** । अत एव **शब्दरूपमीमांसायामपि वर्धमानाचार्यो**ऽ[3]प्याह — ' सुमनं सुमनस्सुमना[3] बहुषु ' इति—

तत्तुच्छम् । सर्वग्रन्थकर्त्रपेक्षया **वामनस्य** प्राचीनत्वेनाभ्यर्हितत्वात् प्रबलत्वाच्च, स्वयं च निरङ्कुशत्वाद्वामनाचार्यसिद्धान्तमभिप्रेत्य ' स्त्रियः सुमनसः ' इति सुमन-

---

1. Ms. झूराश्च Śrīharṣa झाराश्च.
2. Śrīharṣa—वर्धनाचार्यः
3. Śrīharṣa—सुमनः

संस्कर्तुष्टिप्पणिका

* आदिशब्दस्येदृगर्थवर्णनं न केनापि अमरटीकाकारेणोत्प्रेक्षितपूर्वम् । भानुजि-महेश्वर-क्षीरस्वामि-सर्वानन्दादिभिः हर्म्यादिरित्यत्र आदिपदेन स्वस्तिकादिगृहविशेषा एव गृह्यन्ते ।

† अत्रापि शब्दरत्नोक्तेः सामान्येन वर्तमानसर्वकोशार्थे लक्षणया तात्पर्यम् । प्रकृतसन्दर्भस्य अमरकोशे हर्म्यादिवाक्यस्य । तेन अमरसिंहेन ।

श्शब्दस्य पुष्पसामान्यवाचकस्य बहुत्वमभिहितम्। *वामनेन हि 'बहवस्तु समास्सिकता जलौकसस्सुमनसो वर्षा' इति बहुत्वमेव विहितमित्येतद्विमृष्टं चतुर्थस्तबके[1]। परन्तु 'सुमनं सुमनस्सुमना बहुषु' इति भवदुपोद्घातितवर्धमानाचार्यकारिकायां च 'सुमना[2] बहुषु' इति सान्तस्त्रीलिङ्गस्य सुमनश्शब्दस्य बहुत्वमेव विहितम्। इत्थं च 'स्त्रियस्सुमनस' इति प्रयोक्तुरमरसिंहस्य सुमनश्शब्दस्य पुष्पसामान्यवाचकस्य सान्तत्वमदन्तत्वं च विहितम्; सान्तत्वेऽपि स्त्रीत्वं पुंल्लिङ्गत्वं च, स्त्रीत्वे बहुत्वं, पुंल्लिङ्गत्वे त्वेकवचनत्वमपि; अदन्तत्वे पुंनपुंसकत्वं यावत्संख्यावत्त्वञ्चेत्यभिप्रायः। इदमेव वामनाचार्य-वर्धमानाचार्य-केशवभट्टाचार्य-चक्रवर्त्यादयुक्तीनामाकूतमिति सर्वं रमणीयमेव।

[Puṣpa, Naḍa, Vīraṇa]

यदप्युक्तं 'पुष्पोऽस्त्री कुसुमम् (Vaij. p. 46, line 35)' इति वैजयन्त्याम्; न 'पुष्पम्' (Amara II. 4.17) इति समीचीनम्। किञ्च सुदर्शनाचार्योऽप्याह—'पुष्पोऽस्त्री कुसुमे नीले घृततैलादिकेषु च' इति। यच्च लिखितम्—"'[2]नडस्तु धमनः पोटगलः, अथो काशमस्त्रियाम् (Amara II. 4.162)' इत्यसत्; 'नलोऽम्बुजे नलं न स्त्री धमनाख्यतृणेऽन्तके'[3] इति हेमचन्द्रः।‡ यदपि च प्रलपितं—"'स्याद्वीरणं वीरतरम् (Amara II. 4.164)', तदसत्; 'वीराङ्को वीरवृक्षस्स्याद् वीरणश्चापि वीरकः' इति पर्यायरत्नमालायाम्" इति—

---

1. Śrīharsa—Gap here.
2. Ms. नलस्तु.
3. Ms. अन्तिके. Śrīharṣa : अन्तिकः. For correct reading अन्तेक which is one of the meanings of Nala, see Śabdaratnasamanvayakośa, *GOS.* LIX. p. 298, line 5.

संस्कर्तुष्टिप्पणिका

* इदं च वामनवचनं अमरटीकासर्वस्वे २. ४. १७ सर्वानन्देनोदाहृतं दृश्यते। तत्र दत्तः पाठः 'बहवश्च समाः सिकता वर्षाः सुमनसो जलौकसः' इति। सुमनश्शब्दस्य लिङ्गवचनविचारश्च सर्वानन्देन नाममाला-शूद्रक-मनु-माघोदाहरणपूर्वकं तत्र कृतश्च। इतः पूर्वं 'समा' शब्दटीकायां (I. 4. 20) च सर्वानन्देनेदमुदाहारि वामनकारिकाभागः, यत्रायमार्याया अर्धः 'अप्-अप्सरः-' शब्दाधिको दृश्यते—"बहवश्च समासिकतावर्षाप्सुमनोजलौकसोऽप्सरसः" इति। तत्र अनन्तशयन-ग्रन्थावलिप्रकाशयित्रा तु तदानीमेतस्य वाक्यस्याकरो न ज्ञातः। एतच्च वामनस्य लिङ्गानुशासन-कारिकासु ३१ मितासु दृश्यते (Peterson IIIrd Report, p. 113, line 2).

† चतुर्थस्तबके। अस्याः स्वकीयाया एव साहित्यकल्पलतिकायाः, यस्या इदममरमण्डनं चरमः पञ्चमस्स्तबकः। विस्तरश्च तत्र चतुर्थस्तबके वामन-अमर-रभस-वैजयन्ती-द्विरूप-चतूरूपादिकोशोदाहरणपूर्वं कृष्णसूरिणा विचारितचरोऽयं विषयः (Pp. 43-44, R 5610 B Transcript of Sāhityakalpalatikā).

‡ उपलभ्यमानहैमनानार्थे नेदं वचनमुपलभ्यते।

तदेतत्सर्वमरमणीयम्। पुष्पवीरणनलपदानां पुष्पसामान्यवृक्षविशेषवाचकानां प्रयोगप्रसिद्ध्या नपुंसकत्वं पुंल्लिङ्गत्वं चाभिहितम्।[1]अनुक्तयोः पुंल्लिङ्गयोः (स्त्रीपुंल्लिङ्गयोः?) नपुंसकलिङ्गस्य च 'शेषं तु ज्ञेयं शिष्टप्रयोगतः' (Amara III. 5.46) इति तृतीयकाण्डोक्तप्रक्रियया,

'उक्ता भूरिप्रयोगत्वादेकस्मिन् येऽत्र यौगिकाः।
ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते॥'
(Amara II. 10.46-7)

इति द्वितीयकाण्डोक्तप्रक्रियया च साधितव्यत्वात्।

[Girikā]

'गिरिका बालमूषिका' सिद्धान्तः

यच्च प्रलपितम्—"'गिरिका बालमूषिका (Amara II. 5.12)' इति यदुक्तं, तन्न सम्यक्; बालमूषिकस्य[2] पुंस्त्वेन प्रयोगात्, यथा **शब्दशब्दार्थमञ्जूषायाम्**

'गिरिका गैरिका चैव वसुमत्ती महेश्वरी।
स्त्रीपुंसयोश्च[3]बालेया मूषिका[4] मूषिकश्च सः॥' इति।

उक्तं च **शब्दरत्ने**—'गिरिका मूषिकापत्ये न क्लीबे गिरिका शिवा''' इति—

तदनाघ्राताखिलाभिधानकोशतात्पर्यलेशकम्। 'गिरिका बालमूषिका' इति स्त्र्यपत्यविषयत्वेन प्रयुक्तत्वात्, पुमपत्यविषयत्वे 'गिरिको बालमूषिक' इत्येवोच्येत। किञ्च **शब्दशब्दार्थमञ्जूषा**वचने 'गिरिको गैरिकश्चापि वसुमांश्च महेश्वर' इति पुमपत्यविषयशब्दजातपाठस्य, 'स्त्रीपुंसयोश्च बालेया मूषिका[2] मूषिकश्च स' इत्युत्तरार्धेन स्त्र्यपत्यपुमपत्यक्रमप्रतिपादके(ने)नोनेयत्वेन, तत्रापि 'स्त्रीपुंसयोश्च' इति स्त्र्यपत्यविषये स्त्रीलिङ्गमात्रस्य पुमपत्यविषये पुंल्लिङ्गमात्रस्यापि विहितत्वात्। एतदभिप्रायेणैव **शब्दरत्ने** 'गिरिका मूषिकापत्ये' इत्युक्त्वा 'न क्लीबे' इति नपुंसकलिङ्गाभावो विहितः। अन्यथा

---

1. Śrīharṣa बालमूषीति तस्य.
2. Śrīharṣa बालीयमूषिका.
3. Śrīharṣa मूषिका वत्से.
4. Ms. बार्लायमूषिका.

संस्कर्तुष्टिप्पणिका

† अनुक्तयोरित्यत्र कोशे पंक्तिरशुद्धा। प्रसिद्ध्या पुंल्लिङ्गं नपुंसकलिङ्गं वा एकमेव उक्तम्, प्रयोगतः अनुक्तयोर्लिङ्गयोरूह इति तात्पर्यम्।

* बालेया मूषिका बालमूषिकेत्यर्थः।

' आत्मजस्तनयस्सूनुः सुतः पुत्रः, स्त्रियां त्वमी ।
आहुर्दुहितरं सर्वे, अपत्यं तोकं तयोस्समे ॥
(Amara II. 6. 27-8)'

इत्यत्रात्मजादिशब्दानां पुंल्लिङ्गतायामेव पुत्रिकावाचकत्वं च स्यात्, स्त्रीलिङ्गतायां पुत्रवाचकत्वं वा स्यात्। उभयथा यत्र कुत्रापि प्रयोगाभावात्। तस्माद् गिरिका-दिशब्दानां स्त्र्यपत्यविषयत्वे स्त्रीलिङ्गस्य पुमपत्यविषये पुंल्लिङ्गस्यैव च भाव्यत्वेन, प्रकृते स्त्र्यपत्यविषयत्वेन ' गिरिका बालमूषिका ' ' इत्युक्तमित्यधिकविचारः सुधीभिरुद्भावनीयः।

[Caṭaka, Caṭakā Cāṭakaira]

यदपि वारटितम्—

" ' चटकः कलविङ्कस्यात् तस्य स्त्री चटका तयोः।
पुमपत्ये चाटकैरः स्त्र्यपत्ये चटकैव हि ॥
(Amara II. 5.18)'

इति यत्, तदसत्; एवमुक्तेः प्रयोजनाभावात्; एतत्प्रकरणेऽप्यनुक्तत्वात्, उक्तस्यापि निष्फलत्वात्। [1](यद्येवमन्येषामूहितुमिति (चेत्)[2] ' गिरिका बाल) मूषिका ' इत्याद्युक्तेर्निष्फलतादिदोषबाहुल्यं स्यात्; तत्र *' बालमूषिके '[3] अप्यनुक्तत्वा-दित्यादिकं विचारणीयं विवेकिभिः " इति—

तद् बुद्धिमान्द्यप्रयुक्तम्। कुतः ? व्युत्पित्सुजनपदार्थव्युत्पत्तेरेव प्रयोजनत्वात्। एतत्प्रकरणेऽप्यनुक्तत्वादिहेतोरप्रयोजकत्वाद्यदि ' गिरिका बालमूषिका ' इत्याद्युक्ते-र्नैष्फल्यम्, तर्हि ' ऐणेयमेण्याश्चर्माद्यम्, एणस्यैणमुभे लिषु (Amara II. 5.8.)' इत्याद्युक्तेरपि नैष्फल्यं स्यात्। इष्टापत्तेरिति चेत्, तादृगन्धस्वातन्त्र्यं भवतः केन वा दत्तमित्येतदविचारयोग्यम्।

[Abhisārikā]

अभिसारिकाशब्दसिद्धान्तः

यदप्याक्षोशितम्—" ' कान्तार्थिनी तु या याति संकेतं साभिसारिका (Amara II. 6.10) ' इति न समीचीनम्।

---

1. Ms. Missing ; restored from Śrīharṣa.
2. Missing in Śrīharṣa too.
3. Ms. बालमूषिकेत्युक्तत्वात्.

संस्कर्तुष्टिप्पणिका

* बालमूषिकेऽपि पुमपत्यस्य अनुक्तत्वात्, गिरिक इति पुंल्लिगशब्दस्य अनुक्तत्वादित्यर्थः।

'कान्ताथ सङ्केतगता कान्तेनापि समागता।
स्यात्साभिसारिका नैव न छीबे दौत्यजन्तुषु॥'

इति **शब्दरत्ने**। अत एव **महेश्वरदीक्षितो**ऽपि **बालभागवते**ऽप्याह—

'कान्तं गता कान्तगता रहःस्यात्साभिसारिका।' इति। अपरे त्वालङ्कारिका अप्येवमाहुः" इति—

तदसङ्गतम्।

[Tulākoṭi]

तुलाकोटिशब्दसिद्धान्तः

यदपि चोक्तं "'पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् (Amara II. 6.109)" इति यत्, तदसत्; तुलाकोटिशब्दस्य लिङ्गनिश्चयाभावात्; यदि मञ्जीरपदसाहचर्या[1]त्पुंस्त्वमिति वदति, तर्हि 'तुलाकोटिः स्त्रियां प्रोक्ता मञ्जीरेऽप्यर्बुदे[2] त्रिषु' इति **कोशरत्न**कृतनिर्णयस्य* व्यर्थता स्यात्। 'स्त्रियां तुलाकोटिरासीन् मञ्जीरावर्तयोः (रार्बुदयोः)[3] पुमान्' इति **गोविन्दपादा**युक्तिवैषम्यं प्रसज्येतेत्यलं तत्खण्डनेन" इति—

तदप्यसुन्दरम्। तथा हि तुलाकोटिशब्दस्य नामरूपभेदेनैव स्त्रीलिङ्गस्य प्रत्याय्यत्वात् **कोशरत्न**कारिकायाम् अपिशब्दस्यानुक्तसमुच्चायकत्वेन 'तुलाकोटिः स्त्रियां प्रोक्ता मञ्जीर' इति मञ्जीरार्थे स्त्रीत्वस्यैव विहितत्वेन लिङ्गान्तरसत्ता न शङ्कितव्या। **गोविन्दपादो**क्तौ च 'स्त्रियां तुलाकोटिरासीन्मञ्जीरावर्तयोः (रार्बुदयोः ?) पुमान्' इति मञ्जीरावर्तार्थयोः (रार्बुदार्थयोः) क्रमेण स्त्रीपुंल्लिङ्गयोर्विधाने मञ्जीरार्थे स्त्रीलिङ्गमात्रस्यैव विहितत्वाच्चेति, मञ्जीरपदसाहचर्यात्पुंल्लिङ्गताशङ्का तच्छङ्कितुरपाण्डित्यद्योतनार्थैवेत्यलं तद्विमर्शेन।

---

1. Śrīharṣa sāhityāt.

2. Ms. अतुले. Śrīharṣa उड्डके। For the correct word अर्बुदे see Maṅkhakośa, śl. 182 तुलाकोटिर्मानभेदेऽर्बुदे स्यान्नूपुरे पुमान्। and Hemacandra's Anekāthasaṁgraha, तुलाकोटिर्मानभेदेऽर्बुदे स्यान्नूपुरेऽपि च। IV. 64. The reading 'अम्बुदे' in the Haima-citation in Bhānuji in the N. S. Press edn. is a mistake.

3. Both the Ms. and Śrīharṣa read-'Āvartayoḥ', but it seems to be only a corruption for 'Arbudayoḥ'; 'Arbuda' is known as a meaning of Tulākoṭi, not Āvarta.

संस्कर्तुष्टिप्पणिका

* निर्णयस्य लिङ्गविषयकनिर्णयस्येत्यर्थः।

[Citraka]

' तमालपत्रं तिलकं चित्रकं च विशेषकम् ।[1]
द्वितीयं च तुरीयं च न स्त्रियाम् ; अथ कुङ्कुमम् ॥ '
(Amara II. 6. 123)

इति यत्, तदसत् ।

' फालाङ्गं चित्रकं दिव्यं तिलकं मुखमण्डनम् ।
तमालपत्रं प्रद्युम्नसहायं चापि न स्त्रियाम् ॥

इति **शब्दशब्दार्थचिन्तामणौ** प्रतिपादनात् ।

' स्मरप्रियस्मरोद्योगचित्रकातिमनोहराः ।
विशेषकमुखाः शब्दास्तिलके क्लीबतापि च ॥ '[2]

इति **हेमचन्द्रोक्तेः**[3] । अत एव **पार्थसारथिमिश्रोऽपि शब्दचिन्तामणावाह**— ' किंचापि चित्रकाद्याश्च तिलके पुंनपुंसकाः ' '' इति—

तदेत**दमरसिंहस्य** स्वतन्त्रत्वात् (न ?) विचारणीयम् ।

[Āyati]

आयतिशब्दसिद्धान्तः

यदप्युल्लिखितम् — '' ' तत्कालस्तु तदात्वं स्यात्, आयतिः काल उत्तरः[†] (Amara II. 8.29) ' इत्यत्र आयतिशब्दस्य लिङ्गनिश्चयाभावाद् अनुचितमेतत् । प्रकरणादिना तदसिद्धेश्च । यदि ' स्यात्प्रभावेऽपि चायतिः (Amara III. 3.72.) ' इति नानार्थेषु उक्तत्वात् [4]तत्र प्रकरणात् स्त्रीत्वस्य अक्लृप्तावपि स्त्रीत्वमुन्नेयमिति, तर्हि

---

1. In the printed edns. of the Amarakośa the line reads तमालपत्रतिलक-चित्रकाणि विशेषकम् ।
2. Śrīharṣa. Corrupt.
3. Not found in any lexicon of Hemacandra.
4. Both Ms. and Śrīharṣa corrupt from तत्र to स्त्रीत्वम्. Ms. तत्र प्रकरणात् स्त्रीत्वस्य अक्लप्तादपि. Śrīharṣa तत्र अप्रकरणात् स्त्रीत्वस्य क्लृप्तत्वेऽपि.

संस्कर्तुष्टिप्पणिका

* तदेतत् तिलकपर्यायाणां लिङ्गविभागः अमरसिंहस्य स्वतन्त्रत्वात् तस्य स्वयं तन्त्रप्रवर्तकत्वात् तदुक्तप्रकारेण ग्राह्यः, न तु पर्यनुयोज्यः । अस्तु ग्रन्थान्तरेषु अन्यथा; अमरसिंहस्यैवमभिप्राय इति । एवमर्थस्वीकरणे पंक्तौ ' न विचारणीयम् ' इति पाठेन भाव्यम् । यथाकोशं ' स्वतंत्रत्वाद्विचारणीयम् ' इति पाठस्वीकारे, यदेतत् ग्रन्थान्तरेषु तिलकपर्यायाणां लिङ्गविभाग उदाहृतः खण्डनकृता, तत् अमरस्य स्वतन्त्रत्वात् प्रबलतरप्रमाणतया विचारणीयम्; अर्थात् शब्दार्थचिन्तामण्याद्युक्तिबलादमर-दूषणमनुचितमिति ।

† मुद्रितामरकोशपुस्तकेषु ' उत्तरः काल आयतिः ' इति पाठ उपलभ्यते । तत्र अनन्तशयन-मुद्रिते सर्वानन्दटीकासर्वस्वयुते अमरपुस्तके तु '' स्यायतिः काल उत्तरः ' इति लिङ्गघटितः पाठोऽस्ति । तथा चेत्पाठः खण्डनमण्डनकारयोर्विवादस्यैव नास्त्यवसरः ।

'प्रायशः' (Amara I. 1.3.) इति निबन्धनस्य निष्फलत्वं स्यात्। एतदुपलक्षकमित्युच्यमाने सर्वेषां पर्यायाणां[1] लिङ्गादीनां चोपलक्षका इति स्याताम् (?) एवं च 'स्वरव्ययम् (Amara I. 1. 6.)' इत्युक्त्यैव सर्वेषामुपलक्षकविधया सिद्धिवशाद् ग्रन्थमात्रोच्छेदः स्यादित्यलं धावनेन। एवं च तन्निबन्धनमेव तत्कण्ठबन्धनं जातमिति सूचितम्" इति—

तदेतदसारम्। 'स्त्रियां क्तिन् (Pāṇini 3. 3.94)' इति सूत्रेण निष्पन्नस्य आयति (शब्दस्य) नामरूपभेदेनैव स्त्रीलिङ्गतया प्रत्याय्यत्वात्।

[Nigāla]

यच्च लिखितम्—"'निगालस्तु गलोद्देशे (Amara II. 8.47)' इति न सम्यक्;

'निगालश्च निगाला च निगालं च निगालकम्।
निगाली च गलोद्देशे गलीये वाच्यवच्च तत्॥'

इति **शब्दशब्दार्थमञ्जूषायाम्**। *तत्, उक्तशब्दजातमित्यर्थः" इति—

अत्र निर्झरझरशब्दवत्साधितव्यम्।-

[Phalaka]

यच्च "'फलकोऽस्त्री फलं चर्म सङ्ग्राह्यो मुष्टिरस्य यः (Amara II. 8.90)† इति यत्, तदसत्। †फलकस्त्रिषु विष्ण्वादौ (?) फलकश्चर्मणि स्मृतः'[2] इति **मञ्जूषायाम्**।' शिलाभेदे चर्मणि च फलको सलदो(?) षु (त्रिषु ?)'[3] इति **गोवर्धनोऽप्याह मणौ**।

'दारुपात्रविशेषे च फालेऽश्मनि च चर्मणि।
फलकः पुंसि परदे (?) फलकस्त्रिषु संमतः॥'[4]

इति **शब्दरत्ने**" इति—

तत्र दारुपात्राद्यर्थेषु यथासंभवं त्रिलिङ्गत्वमिति तात्पर्यम्, न तु सर्वेषु त्रिलिङ्गत्वमिति। अत उक्तं 'फलकोऽस्त्री' इति।

---

1. Ms. द्विलिङ्गादीनाम्.
2. 3. 4. Both Ms. and Śrīharṣa are corrupt.

संस्कर्तुष्टिप्पणिका

* तत्, उक्तशब्दजातमित्यर्थ इति उदाहृतश्लोकान्तिमपदव्याख्यानम्। निर्झरझरशब्दवत्, निषेधाभावात् लिङ्गान्तरेऽपि तात्पर्यममरकारस्येत्यर्थः।

† अत्र पूर्वपक्षोदाहृतकोशवाक्यानां पाठः परमशुद्धः।

[Prasthāna]

" ' प्रस्थानं गमनं गमः (Amara II. 8. 95) ' इति यत्, तदसत्।

' गमनं सङ्गतं यानं प्रस्थानं च प्रचालनम्।
[1] प्रचालिकादिशब्दाश्च पुंसि चेति विदुर्बुधाः ॥

इति **शब्दचिन्तामणौ**।

' गमनस्तु कलानाथे महेश्वरवसन्तयोः।
प्रस्थाने बाहुलेये च पुंसि त्रिषु विकारिषु ॥

इति **पर्वतवर्धनो**ऽप्याह **शब्दानुशासने** " इति—

अत्र [2]पीडादिशब्दवत्साधितव्यम् *। किञ्च 'पुंसि च' इति **शब्दचिन्तामणि**कारमतस्य ' पुंसि त्रिषु ' इति भवदभिप्रायानुसृत्या **शब्दानुशासन**मतस्य च परस्पराहतिर्द्रष्टव्या। तन्निवारणे तन्नि (त्वन्नि ?) वारणं† भवतीति।

[Rajas]

यदपि च " ' पांसुर्ना न द्वयो रजः (Amara II. 8. 98) ' इति न समीचीनम्। [3]

' शिरोवाचि शिरश्शब्दः रजोवाचि रजस्तथा।
शिरश्च [4]रज इत्येव मकारान्ते च पुंसि च ॥ '

इति[5] **शब्दचिन्तामणौ** 'रजस्तु पुंस्यकारान्तः पांसौ शंभो (?) ऋतावपि' इत्यादय[6] इति—

तन्न सम्यक्। कुतः ? रज इति शब्दस्य पांसुवाचकस्य सान्तत्व एव द्विलिङ्गनिषेधे तात्पर्याददन्तत्वे तु विनिगमनाविरहाद्युक्तिसहत्वाच्च त्रि (द्वि ?) लिङ्गत्वमेव किं न स्यात्।

---

1. Ms. प्रचोलिका Śriharṣa प्रभालिका.
2. Ms. पीतादि-
3. Ms. has in addition रजोवाचि here.
4. Śrīharṣa corrupt रज इत्येव सकारान्ते.
5. Śrīharṣa wrongly शब्दशब्दार्थचिन्तामणौ.
6. Ms. इति जयः May be the reading is 'इत्यजयः' but such a line does not occur in the well known Ajayakośa and may be from a later Ajaya, author of a Śabdamīmāmsā quoted below under Jāmbūnada.

संस्कर्तुष्टिप्पणिका

* पीडादीति। ' प्रस्थानं गमनं गमः ' इत्यत्र अमरसिंहस्य नुपुंसकविधानं वा लिङ्गान्तरनिषेधं वा अकुर्वतो लिंगान्तरेऽपि तात्पर्यम्। अयं च न्यायः पूर्वं पीडाशब्दविचारे प्रदर्शितः।

† त्वन्निवारणम्। लक्षणया त्वया अमरे उद्घाटितस्य दोषस्य निवारणमित्यर्थः।

‡ ' रजस् ' इति सङ्गृहीतसकारान्तशब्दस्यैव स्त्रीपुंनिषेधः। नैतावता अमरसिंहेन अकारान्तरजशब्दस्य संभवो वा तादृशशब्दस्य द्विलिंगता वा न्यषेधि इत्यर्थः।

[Ketana]

यच्चाह " ' केतनं ध्वजमस्त्रियाम् (Amara II. 8.99)' इति, तदयोग्यम्। ' केतनं पुंसि लक्षुने ध्वजे चन्द्रे च न स्त्रियाम् ' इति **शब्दानुशासनात्** " इति—

अत्र ' अस्त्रियाम् ' इति विशेषविधेरुभयत्राप्यभिप्रेतत्वात्।

[Vāṇijya]

" ' स्त्रियां कृषिः पाशुपाल्यं वाणिज्यं चेति वृत्तयः (Amara II. 9. 2)' इति यत्, तन्न विचारक्षमम्। ' वाणिज्यं चापि वाणिज्यो वाणिज्या चेति संमता ' इति **शब्दचन्द्रिकायाम्**। ' वृत्तौ प्रोक्ता च वाणिज्यं वाणिज्यापि च वाणिजम् ' इति **गोविन्दपादाः** "

इति रटतः **श्रीहर्षस्य** दिनान्ध्यमिति मन्यामहे। यदुत्तरत्र वैश्यवर्ग एव ' वाणिज्यं तु वणिज्या स्यात् (Amara II. 9. 79) ' इति पर्यायस्थले वणिज्या-शब्दस्यैव स्वार्थे अण्-प्रत्ययादौ ' वाणिज्या ' इत्यादिरूपसम्भवात्।

[Aṇu, Tṛṇa, Kaṇa]

यच्च " ' व्रीहिभेदस्त्वणुः[1] पुमान् (Amar II. 9.20)' इति यत्, तन्न मनोहरम्। ' तृणोऽस्त्री च शुके व्रीहि.....डुतादिके[2] ' इति **शब्दरत्ने**। ' कणः कणं च लेशे स्यात् तृणेऽपि तृणमस्त्रियाम् ' इति **शब्दशब्दार्थमञ्जूषायाम्** " इति—

तदेतत् पृष्ठताडनप्रयुक्तदन्तभङ्गायितम्*। यद्धि अणुशब्दे पुंल्लिङ्गं दूषयन्निव तृणकणशब्दयोः स्त्रीपुंल्लिंगत्व (पुंनपुंसकलिंगत्व) प्रदर्शनमिति। †

---

1. Ms. तृण :

2. Ms. corrupt. Śrīharṣa also corrupt : तृणोऽस्त्रि-शु पुटके व्रीहि दुढादिकेऽपि [?]... च।

संस्कर्तुष्टिप्पणिका

* इदं प्रसिद्धदाक्षिणात्याभाणकानुवादः। यद्धीति। न तावदेवमुपेक्षायोग्यं खण्डनकार-वाक्यम्। यतो न तेन अणुशब्दविचारमुपक्रम्य शब्दान्तरविचारेणोपसंहृतम्। यथा च अणुशब्दोऽ मरेण व्राहिभेदे, अन्यत्र लेशार्थे वा (III. 1. 162) पुंस्येव पठितः, तथैव तृणशब्दः सत्यपि पुंल्लिंगे नपुंसक एव, कणशब्दश्च सत्यपि नपुंसकलिंगे पुंस्येव च पठित इति श्रीहर्षस्य तात्पर्यम्। समाधानं तु मण्डनकारेण इतरत्र प्रदर्शितया दिशा सुलभमेव, एकलिंगस्य विधाने, कण्ठोक्त्या कस्यापि लिंगस्य अविधाने च न संभवल्लिङ्गान्तरनिषेध इति।

[Kaṇiśa]

यच्च " ' कणिशं सस्यमञ्जरी (Amara II. 9.21) इत्यसत्। ' कणिशः कण्टकैः(?)छन्नः पत्रलः सस्यमञ्जरी '[1] इति **शब्दशब्दार्थमञ्जूषायाम्**।[2] ' कणिशं कणिशश्चैव कणिशी कणिशापि च ' इति **शब्दचन्द्रिकायाम्** " इति—

अत्र निर्झरशब्दवद् अवगन्तव्यम्।

[Ayogra]

" ' अयोग्रं* मुसलोऽस्त्री स्यात् (Amara II. 9.25)' इत्यसङ्गतम्। 'अयोग्रः कुण्डलादौ च मुसलादौ शरादिके'[3] इति **शब्दरत्ने**। ' अयोग्रोऽस्त्री शरादौ च मुसलादौ च संमतः ' इति **लोकाक्षिभट्टाश्च** " इति—

अत्रापि निर्झरशब्दवदेव।

[Jāmbūnada]

यदपि च ' रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् (Amara II. 9.95)' इत्यसत्। जाम्बूनदशब्दस्यापि पुंल्लिङ्गस्य सत्त्वात्। यदाह **अजयः**†

' लोहजोऽष्टापदो हेम जाम्बूनदमयानुकाः।
क्लीबेऽप्येते च शब्दाः स्युरिति शास्त्रविदो विदुः॥ '

इति **शब्दमीमांसायाम्**। अत एव **शब्दशब्दार्थमञ्जूषायां** च ' हेम जाम्बूनदपदे पुंसि चाहुर्विशेषकाः ' इति—

अत्रापि निर्झरवदनुपदमेवोक्तम्।

[Aśmasāra, Madhu, Caṣaka]

एवमश्मसारपदादावपि। ‡ तत्र तु ' अश्मसारश्चाश्मशारः ' इत्याद्युन्नेयम्।

---

1. Corrupt in both Ms. and Śrīharṣa.
2. Ms. Source name missing. Śrīharṣa शब्दशब्दार्थमञ्जर्याम्।
3. Ms. शतादिके.

संस्कर्तुष्टिप्पणिका

* अयोग्रमिति नपुंसकपाठः क्षीरस्वामि-महेश्वर-सर्वानन्दादिभिरादृतः। भानुजिपुस्तके तु अयोग्र इति पुंपाठो मुद्रितः।

† प्रसिद्धात्प्राचीनात् नानार्थसङ्ग्रहकृतोऽजयपालात् अन्य एवायं शब्दमीमांसाकारोऽर्वाचीनोऽजयः।

‡ खण्डने ' एवमश्मसार-मधु-चषकादीनां यथायोगं योजनीयं सूक्ष्मधीभिरित्युपरम्यते ' इति दृश्यते। तत्र किं वा दूषणममरे खण्डनकारेणाभिप्रेतमिति न ज्ञायते। मण्डनकारेण तु अश्मसारपदे दन्त्ये तालव्यषटितया द्वैरूप्यम्, मधुचषकयोः द्वैलिङ्ग्यं च चर्चापदतया संभाव्य समाहितम्। अनयैव रीत्या मण्डनकाराभिप्रायेण रूपभेदबाहुल्य-द्वैलिङ्ग्यादिविषयः अमरकोशकाराभिप्रायमनुरुध्यैव व्याख्यातव्यः, न तु पुरोभागितया। तदुक्तं पुरुषोत्तमेनेति। नैतद्वाक्यमुपलभ्यमाने पुरुषोत्तमदेवीयेषु द्विरूपादिकोशेषु दृश्यते।

सकारघटितशब्दानां शवर्णेनापि घटना समीचीना। तदुक्तं **पुरुषोत्तमेनापि** 'तालव्या अपि दन्त्यास्स्युः शम्बशूकरसांशवः' इति।

मधुशब्दस्य

मकरन्दस्य मद्यस्य माक्षिकस्य च वाचकः।
अर्धर्चादिगणे पाठात् पुंनपुंसकयोर्मधुः॥' इत्यादि।

चषकपदस्य पानपात्रपरतायां 'चषकोऽस्त्री पानपात्रम् (Amara II. 10. 43)' इति विशेषविधिनैव द्विलिङ्गत्वादित्यादिकं विमृश्य मूलाभिप्रायेणैव सर्वत्र भाव्य-दूषणजातं परिहर्तव्यमित्**यमरसिं**हनिबन्धनमेव सकलशास्त्रमर्मनर्मसचिवायितमिति रमणीयमेव सर्वम्।

इत्थं विपक्षविबुधमस्तकन्यस्तसत्पदम्।†
श्रीहर्षस्यैव शिरसि स्थापितं कृष्णसूरिणा॥

(१) भेद्यभेदकभावं च (२) व्याख्यापद्धतिरूपणम्।
(३) यत्तच्छब्दादिनियतिः (४) प्रयोगाणां च साधनम्॥
(५) **मण्डनं चामरकृतेः** पश्यन्त्वत्र विवित्सवः।
साहित्यकल्पलतिकास्तवकेषु यथाक्रमम्॥

व्याख्यानानि च सन्ति, मूलकृतयो लोके बुधैः कल्पिताः
बह्व्यः, कापि विमर्शनी कृतिरमूषां न प्रणीता पुरा।
तादृक् सर्वविमर्शनी विरचिता सर्वार्थसंशोधिनी
साहित्यामृतसारकल्पलतिका जीयान्मयातारकम्॥

॥ श्रीमते हयग्रीवाय नमः॥

इति श्री**शान्तलूरिवंश**पयःपारावाराकासुधाकरायमाणस्य अनवद्यचतुर्दशविद्यापरिश्रमस्य

गोपालाचार्यसूरेस्तनूजेन कृष्णसूरिणा
विरचितायां **साहित्यकल्पलतिकायाम्**
अमरमण्डनं
नाम पञ्चमः स्तबकः॥

संस्कर्तुष्टिप्पणिका

† खण्डनान्ते पाण्डित्यगर्विणा श्रीहर्षेणोक्तस्यैव श्लोकार्धस्य अन्यथात्र योजनम्॥

इति संस्कर्तृ राघवशर्मणः अमरमण्डनटिप्पणिका समाप्ता॥